खसकन्दः, पुं, (खस इव कन्दोऽस्य ।) क्षीर-कञ्चुकीवृक्षः । इति रत्नमाला ॥ खसगन्धोऽपि क्वचित् पाठः ॥

खसतिलः, पुं, (खसपूय इव तिलति स्निह्यतीति । तिल स्नेहे+कः । अस्य शुक्लस्नेहनिःसरणात् तथात्वम् ।) खखसः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य यथा,—
"तिलभेदः खसतिलः कासश्वासहरः स्मृतः ।
स्याद्वा खसफलोद्भूतं वल्कलं शीतलं लघु ॥
ग्राहि तिक्तं कषायञ्च वातकृच्च कफास्रहृत् ।
धातूनां शोषणं रूक्षं मदकृद्वाग्विवर्द्धनम् ॥
मुहुर्मोहकरं रुच्यं सेवनात् पुंस्त्वनाशनम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खसमः, पुं, (खेनाकाशेन समः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

खसम्भवा, स्त्री, (खे सम्भवतीति । सम्+भू+अच् ।) आकाशमांसी । इति राजनिर्घण्टः ॥

खसर्पणः, पुं, (खे शून्ये सर्पणमस्य योगप्रभावात् ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

खसात्मजः, पुं, (खसायाः कश्यपपत्न्या आत्मजः ।) राक्षसः । इति त्रिकाण्डशेषः ॥

खसृमः, पुं, विप्रचित्तिदैत्यपुत्त्रः । यथा,—
"सिंहिकायां समुत्पन्ना विप्रचित्तिसुतास्तथा ।
व्यंशः शल्यश्च बलवान् नभश्चैव महाबलः ॥
वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा ।
अन्तको नरकश्चैव कालनाभस्तथैव च ॥
निवातकवचा दैत्याः प्रह्लादस्य कुलेऽभवन् ॥"
इति गारुडे ६ अध्यायः ॥

खखसः, पुं, (खस+पृषोदरात् ह्रस्वम् ।) वृक्ष-विशेषः । पोस्ता इति भाषा ॥ तत्पर्य्यायः । सूक्ष्मबीजः २ सूक्ष्मतण्डुलः ३ सुबीजः ४ । अस्य गुणः । पाके मधुरत्वम् । कान्तिवीर्य्यबल-प्रदत्वञ्च । इति राजनिर्घण्टः ॥ (खसतिलशब्दे-ऽस्य गुणादयो ज्ञातव्याः ॥)

खखसरसः, पुं, (खखसस्य क्षुद्रबीजवृक्षविशेषस्य रसः ।) अहिफेनः । इति राजनिर्घण्टः ॥ आफिं इति भाषा ॥

खस्तनी, स्त्री, (खं आकाशं स्तनवद्यस्याः मेघ-वारिपतनेन शस्याद्युत्पत्तेः पुत्त्रस्थानीयानां पृथिवीस्थजीवानां जीवनधारणात् तथात्वम् ।) पृथिवी । इति त्रिकाण्डशेषः ॥

खस्फाटिकः, पुं, (खवत् निर्म्मलः स्फाटिकः । यद्वा खस्फटिकः सूर्य्यः स अधिष्ठाताऽस्य ।) सूर्य्य-कान्तमणिः । चन्द्रकान्तमणिः । इति हेमचन्द्रः ॥

खाखसः, पुं, (खस प्रकारे द्वित्वं ततः पृषो-दरात् साधुः ।) बीजविशेषः । पोस्तादाना इति भाषा । तत्पर्य्यायगुणाः ।
"तिलभेदः खसतिलः खाखसश्चापि स स्मृतः ।
स्याद्वा खसफलोद्भूतं वल्कलं शीतलं लघु ॥
ग्राहि तिक्तं कषायञ्च वातकृत् कफकासहृत् ।
धातूनां शोषकं रूक्षं मदकृद्वाग्विवर्द्धनम् ॥
मुहुर्मोहकरं रुच्यं सेवनात् पुंस्त्वनाशनम् ॥

अथ अफेनम् ।
उक्तं खसफलक्षीरमाफुकमहिफेनकम् ।
आफुकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम् ॥
तथा खसफलोद्भूतं वल्कलप्रायमित्यपि ।
अथ खसबीजम् ।
उच्यन्ते खसबीजानि ते खाखसतिला अपि ॥
खसबीजानि बल्यानि वृष्याणि सुगुरूणि च ।
जनयन्ति कफं तानि शमयन्ति समीरणम् ॥"
इति भावप्रकाशः ॥

खाजिकः, पुं, (खे ऊर्द्ध्वदेशे आजः क्षेपः तत्र साधुः ठन् ।) लाजाः । इति हारावली ॥ खै इति भाषा ॥

खाटः पुं, स्त्री, (खे ऊर्द्ध्वमार्गे अटत्यनेन । अट्+करणे घञ् ।) शवरथः । इति शब्दरत्नावली ॥ मरार खाट् इति भाषा ॥

खाटिः, स्त्री, (खट् काङ्क्षायां बाहुलकात् इञ् ।) असन्धुः । किणः । शवरथः । इति मेदिनी ॥

खाटिका, स्त्री, (खाटि+स्वार्थे संज्ञायां वा कन् ततष्टाप् ।) खाटः । शवरथः । इति शब्द-रत्नावली ॥

खाण्डवं, क्ली, (खाण्डयास्तदाख्यया प्रसिद्धाया नगर्य्यां जातम् । खाण्डवी+अण् । यदुक्तं कालिकापुराणे ६० अध्याये ।
"पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम् ।
भङ्क्त्वा वनं ततश्चक्रे तेन तत् खाण्डवं वनम् ॥")
वनविशेषः । तद्विवरणं यथा,—
"विरूपस्याभवद्राधिर्गाधेर्म्मित्रोऽभवत् सुतः ।
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत् ।
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा ।
शक्रस्यानुमते चक्रे खाण्डवं शतयोजनम् ॥
यत् सव्यसाची ह्यदहत् पाण्डुपुत्त्रः प्रतापवान् ।
आवहन् परमां प्रीतिं ज्वलनस्य महात्मनः ॥
ऋषय ऊचुः ।
कथं स खाण्डवं चक्रे विजयः शतयोजनम् ।
तद्वयं श्रोतुमिच्छामः कथयस्व तपोधन ! ॥
मार्कण्डेय उवाच ।
सोमवंशेऽभवद्राजा महात्मा स महाबलः ॥
धीरः सुदर्शनो नाम चारुरूपः प्रतापवान् ।
स वै हिमवतो नातिदूरे भङ्क्त्वा महावनम् ॥
सिंहान् व्याघ्रान् समुत्सार्य्य क्वचिच्चापि तपो-धनान् ।
खाण्डवीं नाम नगरीमकरोत्तत्र शोभनाम् ॥
त्रिंशद्योजनविस्तीर्णामायतां शतयोजनम् ।
उच्चप्राकारसंयुक्तां साट्टालाम्बुदतोरणाम् ॥
निम्नाभिरतिदीर्घाभिः परिखाभिः समावृताम् ।
दीर्घिकाभिश्चोपवनैर्बहुभिश्चाम्बरोगणैः ॥
आकीर्णाञ्च तथावासैरुत्तमैरपि मानवैः ।
सोत्सवाः सततं यत्र जना देवान् दिवि स्थितान् ॥
स्पर्द्धन्ते स्म मुदा युक्ता आढ्या भोगसमन्विताः ।
स वै सुदर्शनो राजा खात्वा भूमिं विदार्य्य च ॥
गङ्गां कनखलां देवीं वाहयामास खाण्डवीम् ।
आनाय्य खाण्डवीमध्यं तेन खातैश्च वर्त्मभिः ॥
वक्रास्तु वक्रगा भूत्वा याति सीतां नदीं प्रति ।
स जित्वा सकलान् भूपान् वित्तान्याहृत्य भूरिशः ॥
राशीचकार खाण्डव्या मध्ये रत्नैरनेकशः ।
अन्येषां नगरेभ्यस्तु जनानानीय भूपतिः ॥
खाण्डव्यां वासयामास हठादपि सुदर्शनः ।
देवदानवगन्धर्व्वान् जित्वा जित्वा युधा कृती ॥
देववृक्षं देवरत्नं देवीश्चापि तथौषधीम् ।
खाण्डव्यां रोपयामास सहामात्यः सुदर्शनः ॥
असहिष्णुस्ततो जिष्णुर्भूपतिन्तं सुदर्शनम् ।
कृतापचारं बहुधा देवानाञ्च तथा नृणाम् ॥
वाराणसीपतिं वीरं विजयं जयशालिनम् ।
सन्धाय कृत्वा साचिव्यं तत्रैवासौ न्ययोजयत् ॥
विजयो विवरं प्राप्य महाबलपराक्रमः ।
सुदर्शनस्य नृपतेरवस्कन्दमथाकरोत् ॥
नासहत् सोऽप्यवस्कन्दं विजयस्य सुदर्शनः ।
चतुरङ्गबलेनाशु युद्धायाभिमुखोऽभवत् ॥
विजयो रथमारुह्य नियुज्य चतुरङ्गिणीम् ।
सेनां सुदर्शनं योद्धुं सम्मुखोऽभवदञ्जसा ॥
तदा महद्युद्धमासीद्विजयेन महात्मना ।
सुदर्शनस्य नृपतेर्वृत्रवासवयोरिव ॥
ततः सुदर्शनो राजा दारितो गदयाऽपतत् ।
तस्मिन्निपतिते वीरे सेनाभिस्तस्य सैनिकाः ॥
भयात् संप्राद्रवन्नस्मादिशः प्रदिश एव च ।
नष्टेषु तस्य सैन्येषु विजयः खाण्डवीं पुरीम् ॥
प्रविश्य ददृशे तत्र राशीभूतान् गिरीनिव ।
सुवर्णानाञ्च रत्नानां सञ्चयान् बहुशः पुरः ॥
दृष्ट्वा सरांसि तत्राथ प्रफुल्लकमलानि तु ।
हंसकारण्डवानादनादितानि समन्ततः ॥
राशीन् सुवर्णरत्नानां पर्व्वतानिव विस्तृतान् ।
पुष्पितान् देववृक्षांश्च भ्रमद्भ्रमरभूषितान् ॥
प्रासादान् विपुलान् शुभ्रान् कैलाससदृशान् गजान् ।
विस्फुटांश्च सुगन्धाढ्यान् प्रतिगेहे व्यवस्थितान् ॥
उत्फुल्लनयनो राजा विजयः परवीरहा ।
मेनेऽमरावतीं तान्तु पुरीं क्षितिगतामिव ॥
तं वीक्षन्तं नरपतिं नगरीं तां सुरेश्वरः ।
समेत्य विजयं प्राह सान्त्वयन् श्लक्ष्णया गिरा ॥
इन्द्र उवाच ।
राजन्महद्वनमिदमासीद्देवगणावृतम् ।
नरगन्धर्व्वयक्षाणां मुनीनाञ्च मनोहरम् ॥
सर्व्वानुत्सार्य्य देवादीन्मम चाप्यप्रिये रतः ।
भङ्क्त्वा वनमिदं गुह्यं समुत्साद्य तपोधनम् ॥
खाण्डवीं नगरीं चक्रे हठाद्राजा सुदर्शनः ।
तदिदं पुनरेव त्वं वनं कुरु नृपोत्तम ! ॥
तत्राहं विहरिष्यामि शच्या सह रहः ।
मुनीनाञ्च तपः स्थानं मण्डलं ते प्रसादतः ॥
भविष्यति च यक्षाणां किन्नराणाञ्च पार्थिव ! ॥
मार्कण्डेय उवाच ।
एतत् श्रुत्वा वचस्तस्य शक्रस्य विजयस्तदा ।
वनमेवाकरोत्तान्तु खाण्डवीं शक्रगौरवात् ॥
गच्छन्तु भो यथास्थानं प्रजाः सर्व्वा यथेच्छया ।